जेऽ समानीतं सुवर्णकलशोस्थितं ॥ आचम्यतां हृषीके
शोपरिपूर्णीयतेनमः ॥ १० ॥ यस्युरुषेणेति आचमनं ॥ नमस्ते
भगवान्विष्णो नमस्ते मधुसूदन ॥ नमस्ते सर्वलोकेश न
मस्ते धरणीधर ॥ ११ ॥ तथा मधुपर्कं ॥ पंचामृतमया
नीतंपयोदधीघृतंमधु ॥ एकैरापृतसंयुक्तंसार्धंप्र
तिगृह्यतां ॥ १२ ॥ आप्यायस्वेतिपंचामृतं ॥ गंगादिस
र्वतीर्थेभ्यानीतंजलमुत्तमं ॥ स्नानार्थंदेवदेवेश
राजपुरुषोनम ॥ १३ ॥ तस्माद्यज्ञात्सर्वहुतश्शुद्धोदकं

॥ १ ॥ ॥ १ ॥

अनं॰ क्रमा॰

श्रीगणेशायनमः ॐ ॥ सूर्योक्तएवं॰ थौ॥ ममसमस्त
पापक्षयार्थंश्रीमनंतप्रीत्यर्थंसकलमनोरथप्राप्त्यर्थंन्यूत
नानंतधारणंश्रीपरमेश्वरप्रीत्यर्थंयथामीलितोपचा
रैःपूजनंचकरिष्ये॥तदंगकलशाराधनंचकरिष्येस्व
स्तिवाचनंकृत्वाशुचौदेशेचतुर्वर्णैःसर्वतोभद्रंविलिख्य
तदुपरिअक्षयंकलशंनिधायतदुपरिवंशपात्रंसंस्थाप्य
कुंकुमाक्षतान्गृहीत्वा॥तदस्त्रमूलमंत्रेणप्रणिपत्यच

तुर्भुजं॥नवाम्रपल्लवाभासंपिंगश्मश्रुलोचनं॥१॥
पीतांबरधरंदेवंशंखचक्रगदाधरं॥दक्षिणोर्ध्वकरेण
नेदधाद्वंशंस्वमधःकरे॥२॥स्यमानसेकर्णिकायध्ये
यश्चापिचतुर्भुजाः॥कृत्वाहेममयंदेवंदर्भैरपिसुशो
भनैः॥३॥तस्यावामतोदद्यंसरत्नंकुंकुमोक्तंसुदोरकं॥
चतुर्दशाग्रथियुतंनामभिस्तंप्रपूजयेत्॥४॥सहस्र
शीर्षेतिध्यानं॥आगच्छानंतदेवेशतेजोराशेजगत्पते॥१

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अनेकधा

श्रीगणेशायनमः ॐ ॥ पूर्वोक्तएवं० धौ ॥ ममसमस्त
पापक्षयार्थंश्रीमनंतप्रीत्यर्थंसकलमनोरथप्राप्त्यर्थंनृत
नानंतधारणंश्रीपरमेश्वरप्रीत्यर्थंयथामीलितोपचा
रैःपूजनंचकरिष्ये ॥ तदंगकलशाराधनंचकरिष्यो स्व
स्तिवाचनंकृत्वाशुचौदेशेचतुर्वर्णैःसर्वतोभद्रंविलिख्य
तदुपरिअष्टदलंकलशंनिधायतदुपरिवंशपात्रंसंस्थाप्य
कुंकुमाक्षतान्गृहीत्वा ॥ तदस्तुमूलमंत्रेणप्रतिपत्यच

तुर्भुजं ॥ नवाम्रपल्लवाभासंपिंगश्मश्रुलोचनं ॥ १ ॥
पीतांबरधरंदेवंशंखचक्रगदाधरं ॥ दक्षिणोर्ध्वैकरेण
नंदधाद्वंशंवामधःकरे ॥ २ ॥ स्यमानसेकपिंलक्ष्मध्ये
सश्चापिचतुर्भुजाः ॥ कृत्वाहेममयंदेवंदर्भैरपिसुशो
भनैः ॥ ३ ॥ तस्यावृग्यतोदक्षेस्रक्चंकुंकुमोक्षंसुदोरकं ॥
चतुर्दशाग्रथियुतंनामभिस्तंप्रपूजयेत् ॥ ४ ॥ सहस्र
शीर्षेतिध्यानं ॥ आगच्छानंतदेवेशतेजोराशेजगत्पते ॥ १

इमांमयाकृतांपूजांगृहाणपुरुषोत्तम॥५॥पुरुषएवेत्यावा
हनं॥आसतांभगवान्विष्णोआसनेस्मिन्स्थिरोभव॥या
वत्तंसमाप्येतावत्वंसंनिधोभव॥६॥एतावानस्येत्यासनं॥
अनंतगुणरत्नायविश्वरूपधरायच॥नमोमहात्मनेयाय
अनंतायनमोनमः॥७॥नमस्तेदेवदेवेशनमस्तेधरणीधर॥
पाद्यंगृहाणदेवेशगंधपुष्पाक्षतैःसह॥८॥त्रिपादूर्ध्वमितिपाद्यं॥
अनंतायनमस्कृत्यंसहस्रशिरसेनमः॥नमस्तेपद्मनाभा
यगृहाणार्घ्यंनमोस्तुते॥९॥नस्माद्विराळित्यर्घ्यं॥गंगा

स्नानं॥नारायणनमस्तेस्तुनरकार्णवतारण॥अनंतपरि
धानार्थंपीतवस्त्रंनमोस्तुते॥१४॥तस्माद्यज्ञाज्जायंतेतिवस्त्रं
पुष्पे॥कुंडलेहारकेयूरमुद्रिकाकंकणादिच॥भूषणानिगृह्ण
ीष्वमनंतायनमोनमः॥१५॥हिरण्यवर्णामितिभूषणं॥
दामोदरनमस्तेस्तुत्राहिमांभवसागरात्॥अक्षतश्चंदनो
पेतंगृहाणपुरुषोत्तम॥यज्ञोपवीतेतियज्ञोपवीतं॥श्री
खंडचंदनोन्मिश्रंगंधादिसुमनोहरं॥विलेपनंसुरश्रेष्ठप्री
त्यर्थंप्रतिगृह्यतां॥१७॥गंधद्वारेतिगंधं॥गृहीत्वाश्वेतनर्णी

स्कतंदुलान्रकुंकुमैः सह॥ अक्षतार्घ्यमयादत्तंगृहाण रूपपूजिता॥
अक्षताः॥१८॥ माल्यादीनिपुष्पाणि॥ अथांगपूजाः॥ अनंताय
नमः॥ पादौपूजयामि॥ संकर्षणायनमः॥ गुल्फौ॥ कालात्मनेनमः॥
जंघे॰॥ विश्वात्मनेनमः॥ जानुनी॰॥ विश्वरूपायनमः॥ कटिं॰॥ चि
श्चमूर्त्तयेनमः॥ मेढ्रं॰॥ पद्मनाभायनमः॥ नाभिं॰॥ परमात्मने॰॥
हृदयं॰॥ श्रीकंठा॰॥ कंठं॰॥ सर्वात्मधारिणे॰॥ वाहुं॰॥ वाचस्प
तये॰॥ मुखं॰॥ केशवायन॰॥ ललाटं॰॥ सर्वेश्वरायपू॰॥ शिरसि॰॥१२॥
कालात्मने॰॥ सर्वग्रंथिंपूजयामि॥ कालात्मसर्वभूतात्मा

वेदात्माविश्वतोमुखः॥ जन्ममृत्युजराव्याधिसंसारभयना
शनाय॥१९॥ अथग्रंथिपूजा॥ श्रीकृष्णायनमः॥ प्रथमग्रंथिं
जयामि॥ अग्नये॰॥ द्वितियग्रंथिंपूजयामि॥ सूर्याय॰॥ तृती
यग्रंथिंपूजयामि॥ सहस्राक्षायनमः॥ चतुर्थग्रंथिंपूजयामि॥
सुरेनाथायनमः॥ पंचमग्रंथिंपूजयामि॥ षष्ठग्रंथिंपू
पितामहाय॰॥ जयामि॥ पिनाकिनेनमः॥ सप्तमग्रंथिंपूज
यामि॥ विधात्रे॰॥ अष्टमग्रंथिंपूजयामि॥ स्कंदाय॰॥

नवमग्रंथिंपूजयामि॥श्यामायः॥दशमग्रंथिंपूजयामि॥
वरूपायः॥एकादशग्रंथिंपूजयामि॥पवनायसःद्वादश
ग्रंथिंपूजयामि॥दृष्टिव्यात्मनेः॥त्रयोदशग्रंथिंपूजया
मि॥वासयायः॥चतुर्दशग्रंथिंपूजयामि॥१४॥वनस्पत्यो
रसोः॥पुरुषजोनिंचुपेः॥माज्यंश्रेः॥ब्राह्मणास्यतिदीपं॥
नैवेद्यंः॥अन्नंचतुर्विधंस्वादुरसैःषड्रसान्वितं॥मयानि
वेदितंभक्त्याअनंतायनमोनमः॥२॥चंद्रमामनसोजातइतिने
वेद्यं॥इदंफलमितिफलं॥पूगीफलमितिः॥नाभ्याआसीदितांबूः॥४॥
नैवेद्यंस्वीकुरुदेवमीक्षस्वचक्षुरुन्मीलयकुरु॥ईप्सितंमेवरंदेहिपरत्रेचपरांगतिं॥शर्कराखंडरवा

हिरण्यगर्भेतिदक्षिणा॥नमःसर्वहितार्थायजगदाराध्य
चक्षुषे॥सर्गस्थित्यंतरूपायग्रहाणार्घ्यंनमोस्तुते॥पुनरर्घ्यं॥
श्रीयज्ञानेतिनिराजनं॥अनंतानंतदेवायकालायामिततेज
से॥प्रदक्षिणांकरिष्यामिश्रद्धाविच्छ्रिवात्मने॥२३॥यानिका
नितिप्रदक्षिणा॥यथात्वंसर्वलोकानामिंद्रादीनांवरक्षसः॥
*तथामांपालयस्वेशत्वंदध्रिंश्रारणागतः॥२३॥अनंतायन
मस्तुभ्यंमनंतजगतांपते॥पुनःपुर्नमस्यामित्वदध्रिंश्रीणांरे
प्रभो॥२४॥नमस्तेदेवदेवेशनमस्तेधरणीधर॥नमस्तेदेव

ज्ञानस्वरूपेपुरुषोत्तम॥२५॥इतिनमस्कारः॥अथदोरग्रहणं॥दा
रिद्र्यनाशनार्थंसपुत्रपौत्राभिवृद्धये॥अनंतास्यमिदंसूत्रंधार्य
म्यहंमच्युत॥२६॥अनंतकामान्मेदेहिसर्वकामफलप्रद॥अ
नंतोदोरकरूपेणपुत्रपौत्रप्रवर्धनं॥२७॥दोरबंधनमंत्रः॥अनंतसं
सारमहासमुद्रेमग्नसमभ्युद्धरवासुदेव॥अनंतरूपेविनियो
जयस्वअनंतसूत्रायनमोनमस्ते॥२८॥नमस्कृत्य॥संसारग्रंथि
रुग्दारिद्र्यसंक्षयंवांछंतियेकुरुकुलोद्वहाभुवि॥सं
पूज्यचत्रिभुवनेशमनंतदेवंबध्नंतिदक्षिणकरेवरदोरकंते॥२९॥

॥५॥

जीर्णदोरविसर्जनं॥विधिनापूजांकृत्वा॥नमोस्कृदेवदेवायवि
श्वरूपधरायच॥सूत्रग्रंथिषुसंस्थायअनंतायनमोनमः॥३०॥
अनंतसर्वमोनोनामाधारःसर्वकामदः॥व्रतेनानेनसफलीभो
भवत्प्रीतःप्रसीदमम॥३१॥संवत्सरकृतांपूजांसंपाद्यविधिवन्म
म॥व्रतेदानीमनंतत्वंविसृष्टोकंचेच्छाम्यहं॥३२॥जीर्णदो
रकंदत्वावायनंदघात्॥प्रतिगृह्यद्विजश्रेष्ठह्यनंतफलदा
यक॥त्वत्प्रसादादहंविप्रमुच्येकर्मबंधनात्॥३३॥अनं
तःप्रतिगृह्णात्वेनंनोवेदयतिच॥अनंतस्तारकोभाभ्यां

मनंतायनमो नमः॥ प्रतिवचनं॥ दाता च विभुर्भगवा ननंतः प्रति
गृहीता च सएव विष्णुः॥ तस्मात्वयादत्तमिदं हि सर्वं प्रतिगृह्य
तंचमया बिभृत्ये॥ ततः आह्मणरूजनं॥ अथ कथा मे कागृतां को
रणेनश्रणुयात्॥ सूत उवाच॥ ॥ पुरानुजाह्नवीतीरेधर्मो
धर्मपराक्रमः॥ जरासंधवधार्थायराजसूयंमुपाक्रमात्॥ सो
ऽपश्यन्नसहधर्मोसौभीमार्जुनसमन्वितः॥ यज्ञशाल्लांप्रकु
र्वतनानारत्नोपशोभितां॥२॥ मुक्ताफलसमायुक्तांमहे
ऽोत्क्षयसन्निभां॥ यज्ञार्थंभूपतीन्सर्वान्समाकुर्यत्रयत्नतः॥

गांधारीतनयोराजासर्वदान्यपरस्त्नः॥ दुर्योधनइतिख्यातोसमा
गत्यजलाशयं॥३॥ इतिमत्वासन्यपतिः कृष्णेनपीडनीलजेः॥ऊ
र्ध्वकंचुकमापन्नोपथिगच्छन्नजानेः शनैः॥४॥ स्मितवक्त्रासभा
यासन्द्रौपदीचवरांगना॥ ततोगच्छन्सईशानोजलमध्येपपा
तसः॥५॥ पुनःसर्वेन्यपाश्चैवपुरुषाश्चधनाधनाः॥ द्रौपद्याद्या
स्त्रियः सर्वास्मितवक्त्राःसुलोचनाः॥७॥ महाराजाधिराजोसौ
महाक्रोधसमन्वितः॥ विनिर्दृत्यस्वकंराज्यंमातुलेनयुतोन्यपः॥८॥
तस्मिन्काले तुशकुनिः प्रोवाचमधुरंवचः॥ राजेन्प्राकृतवच्चिं

नास्मिन्मर्थे तवभ्रूयतेः॥१०॥मुंचमुंचमहारोषपुरतः कार्यगौरवात्॥
द्यूतोपक्रमणेनैवहरामोराज्यमीदृशं॥११॥तस्माद्गच्छराजेंद्र
सत्रंस्वसर्वंप्रति॥थेसुकामहाराजासमागत्यमरवालयं॥१२॥
समाप्यसत्रंराजानुपुनरागाह्यकंगृहं॥आनीयंपांडुपुत्रांश्चधर्म
भीमार्जुनावरान्॥१३॥द्यूतारंभेनापहृतेसर्वराज्यंसराष्ट्रकं॥
द्यूतेनविजिताःसर्वेपांडवावित्तकल्मषाः॥१४॥तोरण्यांतरेगत्वा
वर्त्ततेवनचारिणा॥१४॥सूतउवाच॥अरण्येवर्तमानास्तेपांडवा
ऊरवःकर्षिता॥कृष्णंदृष्ट्वामहात्मानंप्रणिपत्ययथाक्रमं॥१५॥ ॥४७॥

युधिष्ठिरउवच॥अहंदुःखीसुसंजातोभ्रातृभिःपरिवारितः॥
अहंदुःखीसुसंजातोभ्रातृभिःपरिवारितः॥कथंमुक्तिर्वदास्माकंमनं
तादुःखसागरात्॥१६॥श्रीकृष्णउवाच॥अनंतव्रतमस्त्यन्यसर्वपाप
हरंशुभं॥सर्वकामप्रदंनृणांस्त्रीणांचैवयुधिष्ठिर॥१७॥शुक्लपक्षे
चैतुदश्यांमासिभाद्रपदेशुभे॥तस्यानुष्ठानमात्रेणसर्वपापैः
प्रमुच्यते॥१८॥युधिष्ठिरउवाच॥कृष्णकोयंत्वयाख्यातोयो
नंतइतिविश्रुतः॥किंरूपोनागआहोस्विदनंतस्तुकःस्मृतः॥१९॥
परमात्मातथानंतउताहोअन्यगीयते॥कएषोनंतसंज्ञोवैनस्यंमे

हृषिकेशं ॥२०॥ श्रीकृष्ण उवाच ॥ अनंतइत्यहंपार्थममरूपमि
बोधमे ॥ आदित्यग्रहचारेणयःकालउपपद्यते ॥२१॥ कला
काष्ठामुहूर्तादिदिनरात्रिशरीरवान् ॥ पक्षोमासस्तुवर्षाणि यु
गकल्पव्यवस्थया ॥२२॥ योयंकालोमयाख्यातोसोनंतइति
कथ्यते ॥ सोहंकालोवतिर्णोस्मि भुवोभारावनुत्तये ॥२३॥
दानवानांविनाशाय वसुदेवकुलोद्भवः ॥ मांविद्धनंतपा
र्थत्वंकृष्णंविष्णुहरिंस्त्रियं ॥२४॥ अक्षरंभास्करंव्योमं सर्वव्या
पीनमीश्वरं ॥ विश्वरूपंमहाकायंसृष्टिसंहारकारकं ॥२५॥ प्र ॥८॥

त्यपार्थंमयाभूपविश्वरूपंप्रदर्शितं ॥ पूर्वमेवमहाबाहो योगि
ध्येयमनुत्तमं ॥२६॥ विश्वरूपमनंतंचयास्मिन्निदाभ्रमुर्द्ध
त्रा ॥ वसवोष्टौद्वादशादित्यारुद्राएकादशान्विताः ॥२७॥ स
र्षयसमुद्राश्चपर्वतासरितोद्रुमाः ॥ नक्षत्राणिदिशोभूमिः
पातालंभूर्भुवादिकं ॥२८॥ माकृष्णत्वंसंदेहोसोहंपार्थनसं
शयः ॥ कृष्णेनैवंसमादिष्टोप्रोवाचाथधनंजयः ॥२९॥ अनं
तव्रतमाहात्म्यं विधिंविधिविदांवर ॥ किंदानंकिंफलंतस्यअ
नुष्ठानंचकीदृशं ॥३०॥ केनचादौपुराचीर्णंमर्त्यलोकेनप्रकाशितं ॥

एतत्सर्वं समस्तं विस्तार्यं ब्रूह्यनंत व्रतं हरे॥३१॥श्रीकृष्ण उवाच॥आ
सीत्पुराकृतयुगेसुमंतोनामवैद्विजः॥वेदवेदांगतत्वज्ञोगृहस्थाश्रमक
र्तृकः॥३२॥वसिष्ठगोत्रेचोत्पन्नोस्वस्वरूपांशुगोःसुतौ॥दीक्षांना
मोपमे–वेदोक्तविधिनाततः॥३३॥तस्याःकालेनसंजाताऽतुहिना
नंतलक्षणा॥शीलानामसुशीलासावर्द्धतेपित्रवेश्मनि॥३४॥
मातास्यतस्याःकालेनज्वरदानेनपीडिताः॥विनानाऽनदीतीरे
मृतास्वर्गपुरंययौ॥३५॥सुमंतोचिंततोन्यावै धर्मपुंसःसुतांवरः॥
उपयेमेविधानेनकर्कशांनामनामतः॥३६॥कुशीलांकर्कशांचंडीं ॥९॥

नित्यंकलहकारिणीं॥सापिशीलापितुर्गेहेगृहार्चनरताभवत्॥३७॥
कुड्यस्तंभेगृहेद्वारेदेहलीतोरणादिषु॥चेतुरंगकवर्णैश्चनीलपी
तैःसितासितैः॥३८॥स्वस्तिकैःश्रीवत्सैःश्रीवत्सैश्चार्चयंतीपुनःपुनः॥पि
तादृष्ट्वासुमंतेनस्त्रीचिन्हायोवनेस्थिता॥३९॥ततःकालेबहुति
थेकुमार्यंव्रतचारिणि॥कस्मैदेयामयाकन्याविचार्यैवंसुदुःखिता॥४०॥
एतस्मिन्नंतरेकालेकौंडिन्योप्यागतोद्विजः॥कन्यार्थीचागतःश्री
मान्मुनिसत्तमः॥४१॥पितादद्यामुनिंद्रायकौंडिन्यायशुभेदिने॥
गृह्योक्तविधिनास्याविवाहमकरोत्तदा॥४२॥निर्वर्त्योद्वाहि

कं सर्वप्रोक्तवान्कर्कशोद्विजः॥किंचिद्दायादिकंदेयंब्रा
मातुःपरितोषकं॥४३॥तच्छ्रुत्वाकर्कशाक्रोधात्प्रोत्सार्यगृ
हमंडनं॥पेटायास्कस्थिरंबध्वाप्रातःसोगम्यतामिति॥४४॥
उवाचवित्तनेवास्तिगृहेपरयामिनस्थिते॥तच्छ्रुत्वाविमनः
पार्थंसयतान्मामुनिस्तदा॥४५॥तोज्यविशिष्टचूर्णेनपा
दयंचचकारतं॥कोडिन्योपिविवाहेनापधिगंधेनचैशनैः॥४६॥
॥शीलास्त्रीलमादायगोरथेनस्थमाश्रमं॥माध्यानेनोज
वेळायांसूसुनीर्यसरीतटे॥४७॥यमुनायाह्रदेस्नानार्थंच ॥१०१॥

गामसः॥ददर्शशीलासास्त्रीणांसमुहंरक्तवाससां॥४८॥चतु
र्दश्यांमर्चयंतिभक्त्यादेवंपृथक्पृथक्॥तत्रगत्वाशनैश्शीलां
पप्रच्छस्त्रीकदंबकं॥४९॥आर्याःकिमेतत्कथ्यंहिकिंनामव्रत
मीदृशं॥ताऊचुर्योषितःसर्वाअनंतशक्तिविश्रुतः॥५०॥विधानं
कीदृशंतस्यकिंदानंकस्यपूजनं॥तथास्त्रियश्चान्यसंसृष्टा
ऊचुःसर्वाभ्यतांप्रति॥५१॥शीलेप्रश्नस्त्वयापक्वान्नंपुन्नामघृत
पाचितं॥अर्धंविप्रायदातव्यंमद्भुंजीतवास्वयं॥५२॥कृत्वा
दर्भमयंदेवंफणिसप्तसमन्वितं॥शंखचक्रगदापद्मचतुर्भु

युतंप्रभुं॥५३॥ किरीटहारकेयूररत्नकुंडलशोभितं॥तंनुमानि
मितंसूत्रंकुंकुमोक्तंसुदोरकं॥५४॥चतुर्ग्रंथियुतंवामेकरत
लेन्यसेत्॥मंत्रेणानेनभोशीले – याद्वर्षंसमाप्यते॥५५॥तावत्
स्त्रीपुरुषाभ्यांयमविच्छिन्नंप्रयत्नतः॥अनंतेत्यादिमंत्रेणतद्दो
रकमभिमंत्रयेत्॥५६॥अनंतसंसारमहासमुद्रेमग्नंसमभ्युद्ध
रवासुदे॥अनंतरूपीविनियोजयत्वमनंतसूत्रायनमोनमस्ते॥५७॥
संसारगह्वरमुहासुरक्षंविहर्तुवांछंतिये कुरुकुलोद्भवा
उद्भवाः॥संपूज्यतुत्रिभुवनेशमनंतदेवंबध्नंतिदक्षिणके॥११॥

रेवरदोरकंते॥५८॥अनेनदोरकंबध्वाभोक्तव्यंस्वस्थमान
सैः॥ध्यात्वानारायणंदेवंमनंतंपरमेश्वरं॥५९॥आचार्यायप्र
दातव्यादक्षिणाशक्तिपूर्वकं॥भुक्त्वाचांतेव्रजेद्धेममडेप्रोक्त
मिदंतव॥६०॥एवंकृतेसतस्यसर्वात्माकथयामासधर्मजं॥
सापिभुक्त्वाव्रतंचक्रेशीलाबध्वासुदोरकं॥६१॥पाथेयमर्द्धवि
प्रायदत्वाभुक्तासदक्षिणं॥भर्त्तारंभोजइत्वातुस्वयंभुक्ता
नथैवच॥६२॥पुनर्जगामसाहृष्टागोरथेननिजाश्रमं॥भर्त्ता
सहैवज्ञानैःप्रत्ययस्तस्यैणादभूत्॥६३॥तेनानंतप्रभावेन

बभोगोपनसंकुले॥ गृहाग्रेश्रीपतेर्धनधान्यसमन्वि
ते॥६३॥अकुलेव्याकुलंरम्यंसर्वत्रातिथिपूजनं॥सापिमा
णिक्यकांचीभिःशुक्लारेविभूषिता॥६४॥द्वियामंधसमा
यक्तासाविधिचित्रप्रतिमाबभौ॥विचारगृहभर्तुःसमीपसु
खरूपिणि॥६५॥कदाचिदुपविष्टंतं कुमोक्तंसुदाकं॥कि
मिदंदीर्घकेशीत्वंमामवज्ञायकर्षितं॥६७॥साप्रोवाचनहिस्वा
मिन्नज्ञानेतापंमयाकृतः॥यस्यप्रसादात्संजातंधनधान्यादि

॥१२१॥

संपदाः॥ श्रीलायाहस्तमूलेतु साक्षेपंत्रोटितंरुषा॥ कोनंतइति
मूढेनजल्पनातेनपोडव॥६९॥क्षिप्तोज्वालाकुलेवह्नौहाहा
कृतेप्रधावति॥श्रीलाग्रहीतानत्सूत्रंक्षीरमध्येसमाक्षिपेत्॥७०॥
तेनकर्मविपाकेनतस्यश्रीःक्षयमागताः॥गोधनंतस्करैर्निर्गृ
हंदग्धंधनंहृतं॥७१॥यद्यद्यथागतंगेहेतत्तथैवपुनर्गतं॥स्वज्ञा
तैःकलहश्चैवमित्रैरप्रियमेवच॥७२॥अनंताक्षेपदोषेणदारि
द्र्यंपतितंगृहे॥नकश्चिद्वस्तेलोकोतेनसाईंयुधिष्ठिर॥७३॥
अतीनिवेदमापन्नोदीनःपप्रच्छसुंदरी॥श्रीलेकस्मादिदंप्रा

नंदाऽरिष्यंममस्योभूने ॥७४॥ गोधनंतस्करैर्नितंगृहंदग्धं
धनंहिना॥ स्वजनैःकलहोनित्यंलोकाप्रियवादिनः॥७५॥
॥१३॥ ॥श्रीलोवाच॥ अनंताक्षेपदोषेणस्वामिन्जातंकिलेदृशं॥७६॥
शोधयैकेनकर्मविपाकेनजातंमेब्रूहिनत्वतः॥ ॥पूर्वं॥ पूर्वंकृतंसर्वमि
वदत्तंधृत्वापुनराहतां॥ कौडिन्योवाच॥ श्रीलेकिंकार्यमे
तस्मिन्प्रकारंवक्तुमर्हसि॥७७॥ येनचाहंयथापूर्वंभविष्यामो
वरानने॥ श्रीलोवाच॥ तमेववरदंयाहिप्रसाद्यस्यसंपदः॥७८॥
विपदस्तस्यरोषाद्धनंतःसर्वात्मनानघ॥ तस्यास्तद्वचनंश्रुत्वा
॥१३॥

दुःखसंतप्तमानसाः॥७९॥ ततोजगामकौडिन्योनिर्वेदंग
हनंवन॥ अनंतमनुसाध्यात्वाकाङ्क्षामिकेशवं॥८०॥ व्रतानि
रत्नानंकृत्वाश्रुत्वाचर्यजपन्हरिं॥ विद्रुतःप्रययौपार्थसा र
८१ वयंजनवर्जितं॥ अत्रापश्यन्महाचूतंफलितंपुष्पितंतथा॥ व
र्जितंपक्षिसंघातैःकीटकैर्भ्रमरैस्तथा॥८२॥ तमपृच्छद्द्विजोनं
नंकचिद्दृष्टोमहाद्रुम॥ तदाहिसोप्युवाचेनंनानंतंवेद्महंद्विज॥८३॥
एवंनिराळतस्तेनगांददर्शसवत्सकां॥ तृणमध्येप्रधावंति
मितश्चेतश्चपांडव॥८४॥ सोब्रवीद्धेनकेऽर्हियद्यनंतस्त्वयै

क्षितः॥ गोरप्युवाच कोडिन्यं नानंतेवेद्महंद्विज॥८५॥ततोव्रजंदददर्श
गोरूपंशाडुलेस्थितं॥ दृष्ट्वापप्रछगोस्वामिननंतोवेदितत्वया॥८६॥
तमप्युवाचकोडिन्यंनानंतंवेद्महंद्विज॥ततोव्रजन्ददर्शाग्रेरम्यपु
ष्करिणीद्विजं॥८७॥अन्योन्यनलकल्लोलंवीचिपर्यंतशोभितं॥
छन्नकमलकह्लारैःकुमुदोत्पलमंडितं॥८८॥सेवितभ्रमरैर्ह
ंसैश्चक्रवाकैःकरंडकैः॥ नावप्युक्तस्तकोंडिन्यो नावाभ्यांचो
पलक्षितः॥८९॥ततोव्रजन्ददर्शाग्रेगर्दभंकुंजरंतथा॥तावप्यु
क्तस्तकोंडिन्योभवद्भ्यांनोपलक्षितः॥९०॥नावाभ्यांवी

क्षितोनंतस्तथोक्त्वाविषसादह॥मूर्छांप्रायसकोंडिन्योभूम्योवि
निपपातह॥९१॥तस्मिन्नक्षणोस्तनिर्विघ्नोकोंडिन्यआत्मनो
नमे॥कृपयानंतदेवोपिप्रत्यक्षःसमजात॥९२॥दृष्ट्वाश्रीहरिरूप
णंइतएहिसुधांचह॥गृहांप्रवेशयामासगृहीत्वादक्षिणाकरे॥९३॥
स्वांपुरीदर्शयामासदिव्यनारीपरिष्कृतां॥तस्यांस्वगेहमुद्दीप्त
हेमरत्नादिनिर्मितं॥९४॥तस्मिन्निविष्टमात्मानंदिव्यसिंहास
नेशुभे॥पार्श्वतःशंखचक्राब्जगदागरुडशोभितं॥९५॥दर्शया
मासविप्रायपूर्वोक्तंविश्वरूपिणं॥विभूत्यानंतैरनंतपरमेश्वरं॥९६॥

अ.प्र. ॥१५॥

तंदृष्ट्वाथद्विजोनंतमुवाचपरयामुदा॥कौंडिन्यःनमोनम
स्तेवेधुंदनमस्तेश्रीवत्सलोछनाथतंन्नामस्मरणात्सापन्न
शोषणप्रणश्यनु॥वरेण्ययज्ञपुरुषजगंन्नाथाघभूपते॥४८॥
त्यन्नामः
पापोहंपापकर्माहंपापात्मापापसंभवः॥त्राहिमांकृपयानंत
शरणागतवत्सल॥१०॥अद्यमेसफलंजन्मजीवितंचसुजी
वितं॥यत्तवांघियुगंभोजेमन्यनोमूर्धायते॥११॥तद्धत्वा
नंतदेवोपिददौतस्मैवरत्रयं॥दारिद्र्यंनाशनंधर्मविष्णुलो ॥१५॥

कंचत्राश्चर्यं॥१२॥कौंडिन्योवाच॥कःश्च्युतःकोवृषःकागोःकिं
चपुष्करिणिदृयं॥गर्दभःकुंजरश्चैवदृष्टोविप्रश्चगह्वरं॥१३॥ए
तत्समस्तंमेश्रूहितत्वेनपुरुषोत्तम॥श्रुत्वाब्राह्मणस्यवचःश्रुत्वाप्रोवा.
चाथसुरेश्वरः॥१४॥अनंतउवाच॥सश्रुतश्चक्षोविप्रोसोविद्वा
सोवेदगर्विनाः॥आसीद्धास्त्रंनचप्रादाच्छिष्येभ्यस्तत्तनुगतः॥१५॥
सागोर्वसुधरादृष्टानिफलाबीजहारिणी॥सदंभोगोवृषोदृष्टो
लोभार्थोयस्त्वपंडितः॥१६॥धर्माच्चर्मव्यवस्थानंतद्वपुष्कर
णीदृयं॥पूर्वमासन्नकश्चिद्वैनभोगन्यौतेपरस्परं॥१७॥नश्चि

क्षुभ्यो नविप्रेभ्योदुर्वलेभ्योपिकिंचन॥ दानदत्तंनचार्येभ्योजायते
तेनकर्मणा॥१०८॥अन्योन्यजलसंवेत्रो दृश्यतेतेनकर्मणा॥स्व
रःक्रोधस्तयादृष्टोगौर्दभोमदएवच॥१०९॥आलस्योसाचनंतोहं
गुहासंसारगह्वरं॥इत्यक्तंतेमयासर्वंविप्रगच्छयथासुखं॥११०॥
चरानंतव्रतंतत्रनववर्षाणिपंचच॥उद्यापनव्रतेस्यास्यकुरुत्वं
द्विजसत्तम॥१११॥ततस्तुष्टःप्रदास्यामिनक्षत्रंस्थानमुत्तमं॥को
डिन्योपिगृहंगत्वाचकारानंतसुव्रती॥११२॥स्त्रीलयासहधर्मा
त्माभुक्त्वाभो॰गान्यथेप्सितान्॥पुत्रपौत्रैःपरिवृतोततोमो

॥१६॥

क्षमवाप्तवान्॥११३॥अंतेजगामसस्वर्गंनक्षत्रंवपुनर्वसु॥क
ल्पस्थायीचसंजातो दृश्यतेद्यापिचांबरे॥११४॥सानंतइतिध
र्मेणसम्यक्चीर्णेनपांडव॥आप्तवान्सकलान्कामान्म
नोभिलषितान्नरान्॥११५॥एतत्तेकथितंपार्थव्रतानामुत्तमंव्रतं॥
कृत्वाव्रतमिदंपुण्यंपापेभ्योमुच्यतेनरः॥११६॥योन्योपिकुरु ते
भक्त्यानारीवापुरुषोवा॥इष्टान्भोगानिहप्राप्यममलोकंसगच्छ
ति॥११७॥त्वमप्येतन्महाभागकुरुष्वात्रसमाहितः॥इहभुक्त्वा
महान्भोगाननेस्वर्गंगमिष्यसि॥११८॥येचश्रृण्वंतिसततंयेप

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अ-ग्रे-
॥१७॥

ठंतिचमानवाः॥तेसर्वेपापनिर्मुक्तायास्यंतिपरमागतिं॥१५॥
इतिश्रीभविष्योत्तरपुराणेकृष्णयुधिष्ठिरसंवादेअनंतव्रतकथा
संपूर्णा॥अनंतायनमः॥सुर्यार्पणमस्तु॥श्रीकरुटेश्वरार्पणमस्तु॥
शाके१६६७ दुंदुभिनामसंवत्सरे।भाद्रपदेकृष्णपक्षेएकादशीइंदु
वासरेगदाधरेनलिखितं॥भामेइत्युपनामकं॥व्रतकथासमाप्तः॥

MEMORIAL
॥१७॥